स्फुटम् २० उदितम् २१ दलितम् २२ दीर्णम् २३ स्फुटितम् २४ उत्फुल्लम् २५ प्रफुल्लम् २६। इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशत्याम्। ४७६।
"यद्वधि विरुद्धमात्रा विकसितकुसुमोत्करा श्यामाश्रेणी।
पीतांशुकप्रियेयं तदवधि पल्लीपतेः पुत्री ॥")

विकस्वरः, त्रि, (विकसतीति। वि + कस गतौ + "स्थेशभासपिसकसो वरच्।" ३। २। १७५। इति वरच्।) विकासशीलः। तत्पर्य्यायः। विकासी २। इत्यमरः ॥ "विकसति कस ज गतौ दन्त्यान्तः याथाय भासकसेति वरे विकस्वरः। विकाशः स्फुटने व्यक्ताविति दन्त्यान्ते धरणिः।
'कुशेशयैरत्र जलाशयोषिता
मुदा रमन्ते कलभा विकस्वरैः।
प्रगीयते सिद्धगणैश्च योषिता
मुदा रमन्ते कलभा विकस्वरैः ॥'
इति माघयमकेऽपि दन्त्यवत्त्वम्। (४।३३) कश वधे मूर्द्धन्यान्त इत्यस्य रूपमिति केचित्। कश शब्दे इत्यस्य तालव्यान्तस्य रूपमिति केचित्।" इति तट्टीकायां भरतः ॥ (यथा, कथासरित्सागरे। ४। १५।
"एकस्याः सोत्सुका दृष्टिः पालोकविकस्वरा।
श्रुतेः पार्श्वमपश्यन्त्यास्तदाख्यातुमिवाययौ ॥")

विकस्वरा, स्त्री, (विकस्वर + टाप्।) रक्तपुनर्नवा। इति राजनिर्घण्टः ॥ (विवरणमस्या रक्तपुनर्नवाशब्दे ज्ञातव्यम् ॥)

विकारः, पुं, (वि + कृ + घञ्।) प्रकृतेरन्यथाभावः। तत्पर्य्यायः। परिणामः २ विकृतिः ३ विक्रिया ४। इत्यमरः ॥ विकृत्या ५। इति भरतः ॥ केचित्तु पूर्व्वद्वयं प्रकृतिध्वंसजन्यविकारे यथा काष्ठस्य विकारो भस्म। मृत्पिण्डस्य घट इति। परद्वयं विकारमात्रे यथा मुखस्य विकृतिः क्रोधरक्तता। काष्ठस्य भस्म च। इति भरतः ॥ (यथा, कुमारे। ७। ९५।
"अपि शयनसखिभ्यो दत्तवाचं कथञ्चित्
प्रमथमुखविकारैर्हासयामास गूढ़म् ॥"
प्रकृतिविकृतिः। यथा, हरिवंशे। २४९। ३५।
"शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च।
प्रकृतिश्च विकारश्च यथान्यत् कारणं महत् ॥"
अस्य विशेषविवरणं विकृतिशब्दे द्रष्टव्यम् ॥) रोगः। इति मेदिनी। रे, २१८ ॥ (यथा,—
"विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते।
सुखसंज्ञकमारोग्यं विकारो दुःखमेव च ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये।
मत्स्यः। तत्पर्य्यायो यथा,—
"मत्स्यो मीनो विकारश्च झषो वैशारिणोऽण्डजः।
शकुली पृथुरोमा च स सुदर्शन इत्यपि।
रोहिताद्यास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

विकालः, पुं, (विरुद्धः कार्य्यानर्हः कालः।) दैवपैत्रादिकर्म्मणि विरुद्धकालः। वैकाल इति भाषा। तत्पर्य्यायः। सायः २ दिनान्तः ३ सायाह्नः ४ सायम् ५। इति शब्दरत्नावली ॥ उत्सवः ६ विकालकः ७। इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये। ३५। ३०।
"न लङ्घयेत् तथैवाद्यक् ष्ठीवनोद्वर्त्तनानि च।
नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत् कदाचन ॥")

विकालकः, पुं, (विकाल एव। स्वार्थे कन्।) विकालः। इति त्रिकाण्डशेषः ॥

विकालिका, स्त्री, (विज्ञातः कालो यया। कन्। टापि अत इत्वम्।) मानरन्ध्रा। ताम्री। इति त्रिकाण्डशेषः ॥ ताँबी इति भाषा ॥

विकाशः, पुं, (वि + काशृ दीप्तौ + घञ्।) रहः। प्रकाशः। इत्यमरटीकायां भरतः ॥ विकाशो विजने स्फुटे। इत्यजयः ॥ (यथा, राजतरङ्गिण्याम्। ४। १५५८।
"विकाशः केषाञ्चित् नयनविषमैर्ब्बिन्दुदये:
परेषामुद्भूतिः श्रवणकटुभिर्दीर्घरसितैः।
नचेष्टा काप्यन्योपकृतिपरिहीना जलमुचो
जड़ो वर्षादन्यं गणयति गुणं नास्य तु जनः ॥")

विकाशनं, क्ली, (वि + काश + ल्युट्।) विकाशः। विपूर्व्व-काशृ ङ दीप्तौ इत्यस्मात् अनट्प्रत्ययेन निष्पन्नम् ॥

विकाशी, [न्] त्रि, (विकाशोऽस्यास्तीति। विकाश + इनिः।) विकाशशीलः। इत्यमरटीकायां रायमुकुटः ॥ (यथा, मार्कण्डेये।
"कात्यायनीं तुष्टुवुरिष्टलम्भात्
विकाशिवक्त्रास्तु विकाशिताशाः ॥")

विकाषी, [न्] त्रि, (विकाष + इनिः।) विकाशशीलः। इत्यमरटीकायां भरतः ॥

विकासी, [न्] त्रि, (विकास + इनिः। विकासते इति। वि + कास + णिनिर्वा।) विकस्वरः। इत्यमरः ॥

विकिरः, पुं, (विकिरति मृत्तिकादीन् भोजनार्थमिति। वि + कॄश विक्षेपे + इगुपधेति कः।) पक्षी। इत्यमरः ॥ (अस्य पर्य्यायो यथा,—
"पक्षी खगो विहङ्गश्च विहगश्च विहङ्गमः।
शकुन्तिः पतत्री च विष्किरो विकिरोऽण्डजः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥) कूपः। इति त्रिकाण्डशेषः ॥ (विकीर्य्यते इति। वि + कॄ + घञर्थे कः।) पूजाकालीनविघ्नोत्सारणार्थक्षेपणीयतण्डुलादिः। यथा। पठिति मन्त्र जपान् विकिरानादाय।
"अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥"
इति विकिरेत् ॥
यथा,—
"लाजचन्दनसिद्धार्थभस्मदूर्व्वाकुशाक्षताः।
विकिरा इति सन्दिष्टाः सर्व्वविघ्नौघनाशकाः ॥"
इति तन्त्रसारः ॥
अग्निदग्धादीनां पिण्डम्। यथा, मनुः। ३।२४५।
"असंस्कृतप्रमीतानां योगिनां कुलयोषिताम्।
उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः ॥"
अपि च।
"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते ॥"
इति श्राद्धतत्त्वम् ॥
(यथा च मार्कण्डेये। ३१। १२।
"ये वा दग्धाः कुले बालाः क्रियायोग्या ह्यसंस्कृताः।
विपन्नास्तेऽन्नविकिरसम्मार्ज्जनजलाशिनः ॥")
जलविशेषे, क्ली। तथा च चिन्तामणिधृतवचनम्।
"नद्यादिनिकटे भूमिर्या भवेद्वालुकामयी।
उद्धायते ततो यत्तु तज्जलं विकिरं विदुः ॥
विकिरं शीतलं स्वच्छं निर्द्दोषं लघु च स्मृतम्।
तुवरं स्वादु पित्तघ्नं मनाक् कफकरं स्मृतम् ॥")

विकिरणं, क्ली, (वि + कॄ + ल्युट्। इत्वं रपरत्वम्।) विक्षेपणम्। विहिंसनम्। विज्ञानम्। इति कृधात्वर्थदर्शनात् ॥ (अर्कवृक्षे, पुं। इत्यमरः। २। ४। ८०।)

विकीरणः, पुं, अर्कवृक्षः। इत्यमरः। २।४।८० ॥ (तथास्य पर्य्यायः।
"अलर्कौ गणरूपः स्यान्मन्दारो वसुकोऽपि च।
श्वेतपुष्पः सदापुष्पः सबालार्कः प्रतापसः ॥
रक्तोपरोऽर्कनामा स्यादर्कपर्णो विकीरणः।
रक्तपुष्पः शुक्लफलस्तथास्फोटः प्रकीर्त्तितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

विकीर्णः, त्रि, (विकीर्य्यते स्मेति। वि + कॄ + क्तः।) विक्षिप्तः। छड़ान इति भाषा ॥ यथा,—
"अथ सा पुनरेव विह्वला
वसुधालिङ्गनधूसरस्तनी।
विललाप विकीर्णमूर्द्धजा
समदुःखामिव कुर्व्वती स्थलीम् ॥"
इति कुमारसम्भवे ४ सर्गः ॥

विकीर्णरोम, [न्] क्ली, (विकीर्णानि रोमाण्यस्मिन्निति।) स्थौणेयम्। इति राजनिर्घण्टः ॥

विकीर्णसंज्ञं, क्ली, (विकीर्णमिति संज्ञा यस्य।) स्थौणेयम्। इति राजनिर्घण्टः ॥

विकुक्षिः, पुं, इक्ष्वाकुराजपुत्रः। यथा,—
"वैवस्वतमनोरासीदिक्ष्वाकुः पृथिवीपतिः।
तस्य पुत्रशतञ्चासीद्विकुक्षिर्ज्ज्येष्ठ उच्यते।
सोऽयोध्याधिपतिर्वीरस्तस्य पञ्चदश स्मृताः ॥"
इति वह्निपुराणे सागरोपाख्याननामाध्यायः ॥

विकुर्व्वाणः, त्रि, (विकुरुते इति। वि + कृ + शानच्।) हर्षमाणः। इत्यमरः ॥ (विकृतिप्राप्ते च। यथा, सांख्यदर्शने। १। ६२।
"आकाशस्तु विकुर्व्वाणः स्पर्शमात्रं ससर्ज्ज ह।
बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः ॥")

विकुस्रः, पुं, (विकसतीति। वि + कस + "वौ कसेः।" उणा० २। १५। इति रक्। उत्वञ्चोपधायाः।) चन्द्रः। इत्युणादिकोषः ॥